## विषयो देशे। (८२/१२६१)

समूहः इति निवृत्तम्। षष्ठी समर्थविभक्तिरनुवर्तते। तस्य इति षष्ठीसमर्थाद् विषयः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ विषयः [1]देशश्चेत् स भवति। विषयशब्दो बह्वर्थः। क्वचिद् ग्रामसमुदाये वर्तते, विषयो लब्धः इति। क्वचिदिन्द्रियग्राह्ये, [1]चक्षुर्विषयो रूपम् इति। क्वचिद[2]त्यन्तशीलिते ज्ञेये, देवदत्तस्य विषयोऽनुवाकः इति। क्वचि[3]दन्यत्राभावे, मत्स्यानां विषयो जलम् इति। तत्र देशग्रहणं ग्रामसमुदायप्रतिपत्त्यर्थम्। शिबीनां विषयो देशः शैबः। औष्ट्रः। देशे इति किम्? देवदत्तस्य विषयोऽनुवाकः॥

## राजन्यादिभ्यो वुञ्। (८३/१२६२)

राजन्यादिभ्यः शब्देभ्यो वुञ् प्रत्ययो भवति विषयो देशे इत्येतस्मिन्नर्थे[4]। अणोऽपवादः। राजन्यानां विषयो देशः राजन्यकः। दैवयानकः। आकृतिगणश्चायम्। मालवानां विषयो देशः मालवकः। वैराटकः। त्रैगर्तकः।

राजन्य। [5]देवयान। शालङ्कायन। जालन्धरायण। आत्मकामेय। अम्बरीषपुत्र। वसाति। बैल्ववन। शैलूष। उदुम्बर। [6]बैल्वत। आर्जुनायन। [7]संप्रिय। दाक्षि। ऊर्णनाभ॥

## भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ। (८४/१२६३)

भौरिक्यादिभ्यः ऐषुकार्यादिभ्यश्च यथासङ्ख्यं विधल् भक्तल् इत्येतौ प्रत्ययौ भवतः विषयो देशे इत्येतस्मिन् विषये। अणोऽपवादः। [8]भौरिकिविधः। वैपेयविधः। ऐषुकार्यादिभ्यः – [9]ऐषुकारिभक्तः। [10]सारस्यायनभक्तः।

भौरिकि। वैपेय। भौलिकि। चैटयत। काणेय। वाणिजक। वालिज। वालिज्यक। शैकयत। वैकयत।

ऐषुकारि। सारस्यायन। चान्द्रायण। द्व्याक्षायण। त्र्याक्षायण। औडायन। जौलायन। खाडायन। सौवीर। दासमित्रि। दासमित्रायण। शौद्राण। दाक्षायण। शयण्ड। तार्क्ष्यायण। शौभ्रायण। सायण्डि। शौण्डि। वैश्वमाणव। वैश्वधेनव। नद। तुण्डदेव। विशदेव॥

## सोऽस्यादिरिति च्छन्दसः प्रगाथेषु। (८५/१२६४)

स इति [11]समर्थविभक्तिः। अस्य इति प्रत्ययार्थः। आदिः इति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः। छन्दसः इति प्रकृतिनिर्देशः। प्रगाथेषु इति प्रत्ययार्थविशेषणम्। स इति प्रथमासमर्थाद् [12]अस्य इति षष्ठ्यर्थे

---

1. चक्षुर्विषयं रूपम् क. 2. अव्यभिचारे ज्ञेये क. 3. अव्यभिचारेऽन्यत्राभावे ह. 4. विषये ब. 5. अशितबाभ्रव्य इत्यधिकम् ब. 6. वैतल ब, बैतिल क.ड, बैल्वल अ. इ. फ. ग. 7. आप्रीत अव्रीड क. ड. 8. भौरिकिविधम्, भौलिकिविधम् ब. 9. ऐषुकारिभक्तम् ब. 10. सारस्यायनभक्तः नास्ति ब. 11. प्रथमाविभक्तिः फ. 12. प्रातिपदिकात् इत्यधिकम् क.ड.